

श्री ललिता सहस्रनामम्

Contents

श्री ललिता सहस्रनाम स्तोत्रं

ध्यानं

ओं सिन्दूरारुणविग्रहां त्रिणयनां माणिक्यमौलिस्फुरत्
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां
पाणिभ्यामळिपूर्ण्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामंबिकां
ध्यायेत् पत्मासनस्थां विकसितवदनां पत्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसत् हेमपत्मां वरांगीं
सर्व्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्त्तिं सकलसुरनुतां सर्व्वसम्पत्प्रदात्रीं
सकुङ्कुमविलेपनामळिकचुंबिकस्तूरिकां
समन्दहसितेक्षणां सशरचाप पाशाङ्कुशां
अशेषजनमोहिनीमरुणमाल्यभूषोज्ज्वलां
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकां
अरुणां करुणातरंगिताक्षीं
धृतपाशाङ्कुशपुष्पबाणचापां
अणिमादिभिरावृतां मयूखैरहमित्येव
विभावये महेशीं!

स्तोत्रं

1) ओं श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी
चिदग्निकुण्डसंभूता देवकार्यसमुद्यता

2) उद्यद्भानु सहस्राभा चतुर्बाहुसमन्विता
रागस्वरूप पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला

3) मनोरूपेक्षु कोदण्डा पञ्चतन्मात्रसायका
निजारुणप्रभापूर मज्जद् ब्रह्माण्डमण्डला

4) चम्पकाशोक पुन्नागसौगन्धिकलसत्कचा
कुरुविन्दमणिश्रेणी कनत्कोटीरमण्डिता

5) अष्टमीचन्द्रबिभ्राजदळिकस्थलशोभिता
मुखचन्द्रकळङ्काभ मृगनाभिविशेषका

6) वदनस्मरमांगल्य गृहतोरणचिल्लिका
वक्त्रलक्ष्मी परीवाहचलन्मीनाभलोचना

7) नवचम्पकपुष्पाभनासादण्डविराजिता
ताराकान्तितिरस्कारिनासाभरणभासुरा

8) कदंबमञ्जरीक्लिप्तकर्ण्णपूरमनोहरा

ताटङ्कयुगळीभूततपनोडुपमण्डला

9) पत्मरागशिलादर्श परिभाविकपोलभुः

नवविद्रुमबिंबश्रीन्यक्कारिरदनच्छदा

10) शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला

कर्प्पूरवीटिकामोदसमाकर्षद्दिगन्तरा

11) निजसल्लापमाधुर्य विनिर्भत्सित कच्छपी

मन्दस्मितप्रभापूरमज्जत्कामेशमानसा

12) अनाकलितसादृश्य चिबुकश्रीविराजिता

कामेशबद्धमांगल्यसूत्रशोभितकन्धरा

13) कनकांगदकेयूर कमनीयभुजान्विता

रत्नग्रैवेय चिन्ताकलोलमुक्ताफलान्विता

14) कामेश्वर प्रेमरत्नमणिप्रतिपणस्तनी

नाभ्यालवालरोमाळी लताफलकुचद्वयी

15) लक्ष्यरोमलताधारता समुन्नेयमद्ध्यमा

स्तनभारदळन्मद्ध्यपट्टबन्धवलित्रया

16) अरुणारुणकौसुंभवस्त्रभास्वत्कटीतटि
रत्नकिङ्किणिकारम्यरशनादामभूषिता

17) कामेशज्ञातसौभाग्यमार्द्ववोरुद्वयान्विता
माणिक्यमकुटाकारजानुद्वयविराजिता

18) इन्द्रगोपपरिक्षिप्त स्मरतूणाभजङ्घिका
गूढगूल्फा कूर्म्मपृष्ठ जयिष्णु प्रपदान्विता

19) नखदीधितिसंछन्ननमज्जनतमोगुणा
पदद्वयप्रभाजालपराकृतसरोरुहा

20) शिञ्जानमणिमञ्जीरमण्डितश्रीपदांबुजा
मराळिमन्दगमना महालावण्यशेवधीः

21) सर्व्वारुणानवद्यांगी सर्व्वाभरणभूषिता
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा

22) सुमेरुमद्ध्यशृंगस्था श्रीमन्नगरनायिका
चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता

23) महापत्माटवीसंस्था कदंबवनवासिनी

सुधासागरमद्ध्यस्था कामाक्षीकामदायिनी

24) देवर्षिगणसंघातस्तूयमानात्मवैभवा
भण्डासुरवधोद्युक्त शक्तिसेना समन्विता

25) सम्पत्करीसमारूढ सिन्धुरव्रजसेविता
अश्वारूढाधिष्ठिताश्व कोटिकोटिभिरावृता

26) चक्रराजरथारूढ सर्व्वायुधपरिष्कृता
गेयचक्ररथारूढ मन्त्रिणीपरिसेविता

27) किरिचक्ररथारूढ दण्डनाथापुरस्कृता
ज्वालामालिनिकाक्षिप्त वह्निप्राकारमध्यगा

28) भण्डसैन्यवधोद्युक्त शक्तिविक्रमहर्षिता
नित्यापराक्रमाटोप निरीक्षणसमुत्सुका

29) भण्डपुत्रवधोद्युक्त बालाविक्रमनन्दिता
मन्त्रिण्यंबाविरचितविषंगवधतोषिता

30) विशुक्रप्राणहरणवाराहीवीर्यनन्दिता
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा

31) महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता
भण्डासुरेन्द्रनिर्म्मुक्तशस्त्रप्रत्यस्त्रवर्षिणिः

32) करांगुलिनखोत्पन्ननारायणदशाकृतिः
महापाशुपतास्त्राग्निनिर्द्दग्धासुरसैनिका

33) कामेश्वरास्त्रनिर्द्दग्द्धसभण्डासुरशून्यका
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा

34) हरनेत्राग्निसंदग्द्धकामसञ्जीवनौषधिः
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा

35) कण्ठाधःकटिपर्यन्तमद्ध्यकूटस्वरूपिणि
शक्तिकूटैकतापन्नकट्यधोभागधारिणी

36) मूलमन्त्रात्मिका मूलकूटत्रयकळेबरा
कुळामृतैकरसिका कुळसङ्केतपालिनी

37) कुलांगना कुलान्तस्था कौळिनीकुळयोगिनी
अकुळा समयान्तस्था समयाचारतत्परा

38) मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी

39) आज्ञाचक्रान्तराळस्था रुद्रग्रन्थिविभेदिनी
सहस्रारांबुजारूढासुधासाराभिवर्‍षिणी

40) तटिल्लतासमरुचि षट्चक्रोपरिसंस्थिता
महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी

41) भवानी भावनागम्या भवारण्यकुठारिका
भद्रप्रिया भद्रमूर्‍त्तिः भक्तसौभाग्यदायिनी

42) भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा
शांभवी शारदाराध्या शर्‍व्वाणी शर्‍म्मदायिनी

43) शाङ्करी श्रीकरी साध्वी शरच्चन्द्रनिभानना
शातोदरी शान्तिमती निराधारा निरञ्जना

44) निर्‍ल्लेपा निर्‍म्मला नित्या निराकारा निराकुला
निर्‍ग्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा

45) नित्यमुक्ता निर्‍व्विकारा निष्प्रपञ्चा निराश्रया
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा

46) निष्कारणा निष्कळङ्का निरुपाधिः निरीश्वरा

नीरागा रागमथना निर्म्मदा मदनाशिनी

47) निश्चिन्ता निरहङ्कारा निर्म्मोहा मोहनाशिनी
निर्म्ममा ममताहन्त्री निष्पापा पापनाशिनी

48) निष्क्रोधा क्रोधशमनी निर्ल्लोभा लोभनाशिनी
निस्संशया संशयघ्नी निर्भवा भवनाशिनी

49) निर्व्विकल्पा निराबाधा निर्भेदा भेदनाशिनी
निर्न्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा

50) निस्तुला नीलचिकुरा निरपाया निरत्यया
दुर्ल्लभा दुर्ग्गमा दुर्ग्गा दुःखहन्त्री सुखप्रदा

51) दुष्टदूरा दुराचारशमनी दोषवर्ज्जिता
सर्व्वज्ञा सान्द्रकरुणा समानाधिक वर्ज्जिता

52) सर्व्वशक्तिमयी सर्व्वमंगळा सद्गतिप्रदा
सर्व्वेश्वरी सर्व्वमयी सर्व्वमन्त्रस्वरूपिणी

53) सर्व्वयन्त्रात्मिका सर्व्वतन्त्ररूपामनोन्मनी
माहेश्वरी महादेवी महालक्ष्मीर्म्मृडप्रिया

54) महारूपा महापूज्या महापातकनाशिनी
महामाया महासत्वा महाशक्तिर् महारतिः

55) महाभोगा महैश्वर्या महावीर्या महाबला
महाबुद्धिर् महासिद्धिर् महायोगीश्वरेश्वरी

56) महातन्त्रा महामन्त्रा महायन्त्रा महासना
महायागक्रमाराध्या महाभैरवपूजिता

57) महेश्वरमहाकल्पमहाताण्डवसाक्षिणी
महाकामेशमहिषी महात्रिपुरसुन्दरी

58) चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी
महाचतुःषष्टिकोटियोगिनीगणसेविता

59) मनुविद्या चन्द्रविद्या चन्द्रमण्डलमद्ध्यगा
चारुरूपा चारुहासा चारुचन्द्रकलाधरा

60) चराचरजगन्नाथा चक्रराजनिकेतना
पार्ववती पत्मनयनापत्मरागसमप्रभा

61) पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी
चिन्मयी परमानन्दा विज्ञानघनरूपिणी

62) ध्यानध्यातृध्येयरूपा धर्म्माधर्म्मविवर्जिजता
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका

63) सुप्ता प्राज्ञात्मिका तुर्या सर्व्वावस्थाविवर्जिजता
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी

64) संहारिणी रुद्ररूपा तिरोधानकरीश्वरी
सदाशिवानुग्रहदा पञ्चकृत्यपरायणा

65) भानुमण्डलमद्ध्यस्था भैरवी भगमालिनी
पत्मासना भगवती पत्मनाभसहोदरी

66) उन्मेषनिमिषोत्पन्न विपन्नभुवनावलिः
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात्

67) आब्रह्मकीटजननी वर्ण्णाश्रमविधायिनी
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा

68) श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूळिका
सकलागमसन्दोहशुक्तिसम्पुटमौक्तिका

69) पुरुषार्त्थप्रदा पूर्ण्णा भोगिनी भुवनेश्वरी

अंबिकानादिनिधना हरिब्रह्मेन्द्रसेविता

70) नारायणी नादरूपा नामरूपविवञ्जिता
ह्रीङ्कारी ह्रीमती हृद्या हेयोपादेयवञ्जिता

71) राजराजाञ्चिता राज्ञी रम्या राजीवलोचना
रञ्जिनी रमणी रस्या रणत्किङ्किणिमेखला

72) रमा राकेन्दुवदना रतिरूपा रतिप्रिया
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा

73) काम्या कामकलारूपा कदंबकुसुमप्रिया
कल्याणी जगतीकन्दा करुणारससागरा

74) कलावती कलालापा कान्ता कादंबरीप्रिया
वरदा वामनयना वारुणीमदविह्वला

75) विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी
विधात्री वेदजननी विष्णुमाया विलासिनी

76) क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी
क्षयवृद्धि विनिर्म्मुक्ता क्षेत्रपालसमञ्चिता

77) विजया विमला वन्द्या वन्दारुजनवत्सला
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी

78) भक्तिमत्कल्पलतिका पशुपाशविमोचिनी
संहृताशेषपाषण्डा सदाचारप्रवन्त्तिका

79) तापत्रयाग्निसन्तप्तसमाह्ळादनचन्द्रिका
तरुणी तापसाराध्या तनुमद्ध्या तमोपहा

80) चितिस्तत्पदलक्ष्यार्त्था चिदेकरसरूपिणी
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततीः

81) परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता
मद्ध्यमा वैखरीरूपा भक्तमानसहंसिका

82) कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता
शृंगाररससम्पूर्ण्णा जया जालन्धरस्थिता

83) ओढ्याणपीठनिलया बिन्दुमण्डलवासिनी
रहोयागक्रमाराध्या रहस्तर्प्पणतर्प्पिता

84) सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्ज्जिता
षडंगदेवतायुक्ता षाड्गुण्यपरिपूरिता

85) नित्यक्लिन्ना निरुपमा निर्व्वाणसुखदायिनी
नित्याषोडशिकारूपा श्रीकण्ठार्द्धशरीरिणी

86) प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी

87) व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी
महाकामेशनयन कुमुदाह्ळादकौमुदि

88) भक्तहार्द्दतमोभेदभानुमद्भानुसन्ततीः
शिवदूती शिवाराध्या शिवमूर्त्तिः शिवङ्करी

89) शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा

90) चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका
गायत्री व्याहृतिः सन्ध्या द्विजवृन्दनिषेविता

91) तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता
निस्सीममहिमा नित्ययौव्वना मदशालिनी

92) मदघूर्ण्णितरक्ताक्षी मदपाटलगण्डभूः

चन्दनद्रवदिग्द्धांगी चाम्पेय कुसुमप्रिया

93) कुशला कोमळाकारा कुरुकुल्ला कुळेश्वरी
कुळकुण्डालया कौळमार्ग्गतत्परसेविता

94) कुमारगणनाथांबा तुष्टिः पुष्टिः मतिर्धृतिः
शान्तिः स्वस्तिमती कान्तिर् नन्दिनी विघ्ननाशिनी

95) तेजोवती त्रिणयना लोलाक्षीकामरूपिणी
मालिनी हंसिनी माता मलयाचलवासिनी

96) सुमुखी नळिनी सुभ्रूः शोभना सुरनायिका
काळकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी

97) वज्रेश्वरी वामदेवी वयोवस्था विवर्ज्जिता
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी

98) विशुद्धिचक्रनिलया रक्तवर्ण्णा त्रिलोचना
खट्वांगादिप्रहरणा वदनैकसमन्विता

99) पायसान्नप्रिया त्वक्स्था पशुलोकभयङ्करी
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी

100) अनाहताब्जनिलया श्यामाभा वदनद्वया
दंष्ट्रोज्ज्वलाक्षमालादिधरा रुधिरसंस्थिता

101) काळरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया
महावीरेन्द्रवरदा राकिण्यंबास्वरूपिणी

102) मणिपूराब्जनिलया वदनत्रयसंयुता
वज्रादिकायुधोपेता डामर्यादिभिरावृता

103) रक्तवर्ण्णा मांसनिष्ठा गुडान्नप्रीतमानसा
समस्तभक्तसुखदा लाकिन्यंबास्वरूपिणी

104) स्वाधिष्ठानांबुजगता चतुर्वक्त्रमनोहरा
शूलाद्यायुधसम्पन्ना पीतवर्ण्णातिगर्व्विता

105) मेदोनिष्ठा मधुप्रीता बन्दिन्यादिसमन्विता
दध्यन्नासक्तहृदया काकिनीरूपधारिणी

106) मूलाधारांबुजारूढा पञ्चवक्त्रास्थिसंस्थिता
अङ्कुशादिप्रहरणा वरदादिनिषेविता

107) मुद्गौदनासक्तचित्ता साकिन्यंबास्वरूपिणी
आज्ञाचक्राब्जनिलया शुक्लवर्ण्णा षडानना

108) मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी

109) सहस्रदळपत्मस्था सर्व्ववर्ण्णोपशोभिता
सर्व्वायुधधरा शुक्लसंस्थिता सर्व्वतोमुखी

110) सर्व्वौदनप्रीतचित्ता याकिन्यंबास्वरूपिणी
स्वाहास्वधामतिर्म्मेधाश्रुतिस्मृतिरनुत्तमा

111) पुण्यकीर्त्तिः पुण्यलभ्या पुण्यश्रवणकीर्त्तना
पुलोमजार्च्चिता बन्धमोचिनी बर्ब्बराळका

112) विमर्शरूपिणी विद्या वियदादिजगत्प्रसू
सर्व्वव्याधिप्रशमनी सर्व्वमृत्युनिवारिणी

113) अग्रगण्याचिन्त्यरूपा कलिकन्मषनाशिनी
कात्यायनी कालहन्त्री कमलाक्षनिषेविता

114) तांबूलपूरितमुखी दाडिमीकुसुमप्रभा
मृगाक्षी मोहिनीमुख्या मृडानी मित्ररूपिणी

115) नित्यतृप्ता भक्तनिधिर्‍ नियन्त्री निखिलेश्वरी

मैत्र्यादिवासनालभ्या महाप्रळयसाक्षिणी

116) पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी
माध्वीपानालसा मत्ता मातृकावर्ण्णरूपिणी

117) महाकैलासनिलया मृणाळमृदुदोर्ल्लता
महनीया दयामूर्त्तिः महासाम्राज्यशालिनी

118) आत्मविद्या महाविद्या श्रीविद्या कामसेविता
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका

119) कटाक्षकिङ्करीभूतकमलाकोटिसेविता
शिरःस्थिता चन्द्रनिभा फालसेॅथन्द्रधनुप्रभा

120) हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी

121) दरान्दोळितदीर्घाक्षी दरहासोज्ज्वलन्मुखी
गुरूमूर्त्तिर्ग्गुणनिधिर्ग्गोमाता गुहजन्मभूः

122) देवेशी दण्डनीतिस्था दहराकाशरूपिणी
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता

123) कलात्मिका कलानाथा काव्यालापविनोदिनी
सचामररमावाणी सव्यदक्षिणसेविता

124) आदिशक्तिरमेयात्मा परमापावनाकृतिः
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा

125) क्लीङ्कारीकेवला गुह्या कैवल्यपददायिनी
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्त्तिः त्रिदशेश्वरी

126) त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता
उमा शैलेन्द्रतनया गौरी गन्धर्व्वसेविता

127) विश्वगर्भा स्वर्ण्णगर्भा वरदा वागधीश्वरी
ध्यानगम्यापरिच्छेद्या ज्ञानदा ज्ञानविग्रहा

128) सर्व्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी
लोपामुद्रार्च्चिता लीलाक्लिप्त ब्रह्माण्डमण्डला

129) अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्ज्जिता
योगिनी योगदायोग्या योगानन्दा युगन्धरा

130) इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी
सर्व्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी

131) अष्टमूर्त्तिरजाजैत्री लोकयात्राविधायिनी
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्ज्जिता

132) अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया

133) भाषारूपा बृहत्सेना भावाभावविवर्ज्जिता
सुखाराद्ध्या शुभकरी शोभना सुलभागतिः

134) राजराजेश्वरी राज्यदायिनी राज्यवल्लभा
राजत्कृपा राजपीठनिवेशितनिजाश्रिता

135) राज्यलक्ष्मी कोशनाथा चतुरंगबलेश्वरी
साम्राज्यदायिनी सत्यसन्धा सागरमेखला

136) दीक्षिता दैत्यशमनी सर्व्वलोकवशङ्करी
सर्व्वार्त्थदात्री सावित्री सच्चिदानन्दरूपिणी

137) देशकालापरिच्छिन्ना सर्व्वगासर्व्वमोहिनी
सरस्वती शास्त्रमयी गुहांबा गुह्यरूपिणी

138) सर्व्वोपाधिविनिर्म्मुक्ता सदाशिवपतिव्रता

सम्प्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी

139) कुळोत्तीर्ण्णा भगाराध्या माया मधुमती मही
गणांबा गुह्यकाराध्या कोमळांगी गुरुप्रिया

140) स्वतन्त्रा सर्व्वतन्त्रेशी दक्षिणामूर्त्तिरूपिणी
सनकादि समाराध्या शिवज्ञानप्रदायिनी

141) चित्कलानन्दकलिका प्रेमरूपा प्रियङ्करी
नामपारायणप्रीता नन्दिविद्यानटेश्वरी

142) मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी
लास्यप्रिया लयकरी लज्जा रंभादिवन्दिता

143) भवदावसुधावृष्टिः पापारण्यदवानला
दौर्भाग्यतूलवातूला जराद्ध्वान्तरविप्रभा

144) भाग्याब्धिचन्द्रिका भक्तचित्तकेकीघनाघना
रोगपर्व्वतदंभोळिर्‌ मृत्युदारुकुठारिका

145) महेश्वरी महाकाळी महाग्रासा महाशना
अपर्ण्णा चण्डिका चण्डमुण्डासुरनिषूदिनी

146) क्षराक्षरात्मिका सर्व्वलोकेशी विश्वधारिणी
त्रिवर्ग्गदात्री सुभगा त्र्यंबका त्रिगुणात्मिका

147) स्वर्ग्गापवर्ग्गदा शुद्धा जपापुष्पनिभाकृतिः
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता

148) दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया
महती मेरुनिलया मन्दारकुसुमप्रिया

149) वीराराध्या विराड्-रूपा विरजा विश्वतोमुखी
प्रत्यग्-रूपा पराकाशा प्राणदा प्राणरूपिणी

150) मार्त्ताण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा

151) सत्यज्ञानानन्दरूपा सामरस्यपरायणा
कपर्द्दिनी कलामाला कामधुक् कामरूपिणी

152) कलानिधिः काव्यकला रसज्ञा रसशेवधीः
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा

153) परंज्योतिः परंधाम परमाणुः परात्परा
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी

154) मूर्त्तामूर्त्ता नित्यतृप्ता मुनिमानसहंसिका
सत्यव्रता सत्यरूपा सर्व्वान्तर्यामिणी सती

155) ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्च्चिता
प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृतिः

156) प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी
विशृंखला विविक्तस्था वीरमाता वियत्प्रसूः

157) मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्त्तिनी

158) छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी
उदारकीर्त्तीरुद्दामवैभवा वर्ण्णरूपिणी

159) जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी
सर्व्वोपनिषदुद्‌घुष्टा शान्त्यतीतकलात्मिका

160) गंभीरा गगनान्तस्था गर्व्विता गानलोलुपा
कल्पनारहिता काष्ठा कान्ता कान्तार्द्धविग्रहा

161) कार्यकारणनिर्म्मुक्ता कामकेळितरंगिता

कनत्कनकताटङ्का लीलाविग्रहधारिणी

162) अजाक्षयविनिर्म्मुक्ता मुग्द्धा क्षिप्रप्रसादिनी
अन्तर्म्मुखसमाराध्या बहिर्म्मुखसुदुर्ल्लभा

163) त्रयी त्रिवर्ग्गनिलया त्रिस्था त्रिपुरमालिनी
निरामया निरालंबा स्वात्मारामा सुधासृतिः

164) संसारपङ्कनिर्म्मग्नसमुद्धरणपण्डिता
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी

165) धर्म्माधारा धनाद्ध्यक्षा धनधान्यविवर्द्धिनी
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी

166) विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी
अयोनिर्‍ योनिनिलया कूटस्था कुळरूपिणी

167) वीरगोष्ठिप्रिया वीरा नैष्कर्म्म्या नादरूपिणी
विज्ञानकलना कल्या विदग्द्धा बैन्दवासना

168) तत्त्वाधिका तत्त्वमयी तत्त्वमर्त्थस्वरूपिणी
सामगानप्रिया सोम्या सदाशिवकुटुंबिनी

169) सव्यापसव्यमार्ग्गस्था सर्व्वापद्विनिवारिणी
स्वस्था स्वभावमधुरा धीरा धीरसमर्च्चिता

170) चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया
सदोदिता सदातुष्टा तरुणादित्यपाटला

171) दक्षिणादक्षिणाराध्या दरस्मेरमुखांबुजा
कौलिनी केवलानर्घ्यकैवल्यपददायिनी

172) स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा
मनस्विनी मानवती महेशी मंगळाकृतिः

173) विश्वमाता जगद्धात्री विशालाक्षी विरागिणि
प्रगद्भा परमोदारा परामोदा मनोमयी

174) व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी

175) पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी
शाश्वती शाश्वदैश्वर्या शर्म्मदा शंभुमोहिनी

176) धराधरसुता धन्या धर्म्मिणी धर्म्मवर्द्धिनी
लोकातीता गुणातीता सर्व्वातीता शमात्मिका

177) बन्धूककुसुमप्रख्या बालालीलाविनोदिनी
सुमंगली सुखकरी सुवेषाढ्या सुवासिनी

178) सुवासिन्यर्च्चनप्रीताशोभना शुद्धमानसा
बिन्दुतर्प्पणसन्तुष्टा पूर्व्वजा त्रिपुरांबिका

179) दशमुद्रासमाराध्या त्रिपुराश्रीवशङ्करी
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी

180) योनिमुद्रा त्रिखण्डेशी त्रिगुणांबा त्रिकोणगा
अनघाद्भुतचारित्रा वाञ्छितार्त्थप्रदायिनी

181) अभ्यासातिशयज्ञाता षडद्ध्वातीतरूपिणी
अव्याजकरुणामूर्त्तिः अज्ञानद्ध्वान्तदीपिका

182) आबालगोपविदिता सर्व्वानुल्लंघ्यशासना
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी

183) श्रीशिवा शिवशक्त्यैक्यरूपिणी लळितांबिका
इति श्री लळितासहस्रनामस्तोत्रं सम्पूर्ण्णं

अपराध-शोधन

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि
यत् पूजितं मया देवि परिपूर्ण्णं तदस्तुते

शान्ति मन्त्रं

ओं लोकाः समस्ताः सुखिनो भवन्तु
ओं शान्तिः शान्तिः शान्तिः
ओं श्री गुरुभ्यो नमः हरिः ओं

श्री ललिता सहस्रनामावलि

ध्यानं

ओं सिन्दूरारुणविग्रहां त्रिणयनां माणिक्यमौलिस्फुरत्
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां
पाणिभ्यामळिपूर्ण्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामंबिकां
ध्यायेत् पत्मासनस्थां विकसितवदनां पत्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसत् हेमपत्मां वरांगीं
सर्व्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्त्तिं सकलसुरनुतां सर्व्वसम्पत्प्रदात्रीं
सकुङ्कुमविलेपनामळिकचुंबिकस्तूरिकां
समन्दहसितेक्षणां सशरचाप पाशाङ्कुशां
अशेषजनमोहिनीमरुणमाल्यभूषोज्ज्वलां
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकां
अरुणां करुणातरंगिताक्षीं
धृतपाशाङ्कुशपुष्पबाणचापां
अणिमादिभिरावृतां मयूखैरहमित्येव

विभावये महेशीं!

नामावलि

ओं ललितांबिकायै नमः

1. ओं श्रीमात्रे नमः
2. ओं श्रीमहाराज्ञ्यै नमः
3. ओं श्रीमत्सिंहासनेश्वर्यै नमः
4. ओं चिदग्नि-कुण्ड-संभूतायै नमः
5. ओं देवकार्य-समुद्यतायै नमः
6. ओं उद्यद्भानु-सहस्राभायै नमः
7. ओं चतुर्बाहु-समन्वितायै नमः
8. ओं रागस्वरूप-पाशाढ्यायै नमः
9. ओं क्रोधाकाराङ्कुशोज्ज्वलायै नमः
10. ओं मनोरूपेक्षु-कोदण्डायै नमः
11. ओं पञ्चतन्मात्र-सायकायै नमः
12. ओं निजारुण-प्रभापूर-मज्जद् ब्रह्माण्डमण्डलायै नमः
13. ओं चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्कचायै नमः
14. ओं कुरुविन्दमणि-श्रेणी-कनत्कोटीर-मण्डितायै नमः
15. ओं अष्टमीचन्द्र-विभ्राज-दळिकस्थल-शोभितायै नमः
16. ओं मुखचन्द्र-कळङ्काभ-मृगनाभि-विशेषकायै नमः

17. ओं वदनस्मर-मांगल्य-गृहतोरण-चिल्लिकायै नमः
18. ओं वक्त्रलक्ष्मी-परीवाह-चलन्मीनाभ-लोचनायै नमः
19. ओं नवचम्पक-पुष्पाभ-नासादण्ड-विराजितायै नमः
20. ओं ताराकान्ति-तिरस्कारि-नासाभरण-भासुरायै नमः
21. ओं कदंबमञ्जरी-क्लिप्त-कर्ण्णपूर-मनोहरायै नमः
22. ओं ताटङ्क-युगळी-भूत-तपनोडुप-मण्डलायै नमः
23. ओं पत्मरागशिलादर्श-परिभावि-कपोलभुवे नमः
24. ओं नवविद्रुम-बिंबश्री-न्यक्कारि-रदनच्छदायै नमः
25. ओं शुद्धविद्याङ्कुराकार-द्विजपङ्क्ति-द्वयोज्ज्वलायै नमः
26. ओं कर्प्पूरवीटिकामोद-समाकर्ष-द्दिगन्तरायै नमः
27. ओं निज-सल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छप्यै नमः
28. ओं मन्दस्मित-प्रभापूर-मज्जत्कामेश-मानसायै नमः
29. ओं अनाकलित-सादृश्य-चिबुकश्री-विराजितायै नमः
30. ओं कामेश-बद्ध-मांगल्य-सूत्र-शोभित-कन्धरायै नमः
31. ओं कनकाङ्गद-केयूर-कमनीय-भुजान्वितायै नमः
32. ओं रत्नग्रैवेय-चिन्ताक-लोल-मुक्ताफलान्वितायै नमः
33. ओं कामेश्वर-प्रेमरत्न-मणि-प्रतिपण-स्तन्यै नमः
34. ओं नाभ्यालवाल-रोमाळी-लता-फल-कुचद्वय्यै नमः
35. ओं लक्ष्यरोम-लताधारता-समुन्नेय-मध्यमायै नमः
36. ओं स्तनभार-दळन्मद्ध्य-पट्टबन्ध-वलित्रयायै नमः

37. ओं अरुणारुण-कौसुंभ-वस्त्र-भास्वत्-कटीतट्यै नमः

38. ओं रत्न-किङ्किणिका-रम्य-रशना-दाम-भूषितायै नमः

39. ओं कामेश-ज्ञात-सौभाग्य-मार्द्दवोरु-द्वयान्वितायै नमः

40. ओं माणिक्य-मकुटाकार-जानुद्वय-विराजितायै नमः

41. ओं इन्द्रगोप-परिक्षिप्त-स्मरतूणाभ-जङ्घिकायै नमः

42. ओं गूढगुल्फायै नमः

43. ओं कूर्म्मपृष्ठ-जयिष्णु-प्रपदान्वितायै नमः

44. ओं नखदीधिति-संछन्न-नमज्जन-तमोगुणायै नमः

45. ओं पदद्वय-प्रभाजाल-पराकृत-सरोरुहायै नमः

46. ओं शिञ्जान-मणिमञ्जीर-मण्डित-श्रीपदांबुजायै नमः

47. ओं मराळी-मन्दगमनायै नमः

48. ओं महालावण्य-शेवधये नमः

49. ओं सर्व्वारुणायै नमः

50. ओं अनवद्याङ्ग्यै नमः

51. ओं सर्व्वाभरण-भूषितायै नमः

52. ओं शिव-कामेश्वराङ्कस्थायै नमः

53. ओं शिवायै नमः

54. ओं स्वाधीन-वल्लभायै नमः

55. ओं सुमेरु-मध्य-शृंगस्थायै नमः

56. ओं श्रीमन्नगर-नायिकायै नमः

57. ओं चिन्तामणिगृहान्तस्थायै नमः

58. ओं पञ्च-ब्रह्मासन-स्थितायै नमः

59. ओं महापत्माटवी-संस्थायै नमः

60. ओं कदंबवन-वासिन्यै नमः

61. ओं सुधासागर-मद्ध्यस्थायै नमः

62. ओं कामाक्ष्यै नमः

63. ओं कामदायिन्यै नमः

64. ओं देवर्षि-गण-संघात-स्तूयमानात्म-वैभायै नमः

65. ओं भण्डासुर-वधोद्युक्त-शक्तिसेना-समन्वितायै नमः

66. ओं सम्पत्करी-समारूढ-सिन्धुर-व्रज-सेवितायै नमः

67. ओं अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभि-रावृतायै नमः

68. ओं चक्रराज-रथारूढ-सर्व्वायुध-परिष्कृतायै नमः

69. ओं गेयचक्र-रथारूढ-मन्त्रिणी-परिसेवितायै नमः

70. ओं किरिचक्र-रथारूढ-दण्डनाथा-पुरस्कृतायै नमः

71. ओं ज्वालामालिनिकाक्षिप्त-वह्निप्राकार-मद्ध्यगायै नमः

72. ओं भण्डसैन्य-वधोद्युक्त-शक्ति-विक्रम-हर्षितायै नमः

73. ओं नित्या-पराक्रमाटोप-निरीक्षण-समुत्सुकायै नमः

74. ओं भण्डपुत्र-वधोद्युक्त-बाला-विक्रम-नन्दितायै नमः

75. ओं मन्त्रिण्यंबा-विरचित-विषङ्ग-वध-तोषितायै नमः

76. ओं विशुक्र-प्राणहरण-वाराही-वीर्य-नन्दितायै नमः

77. ओं कामेश्वर-मुखालोक-कल्पित-श्रीगणेश्वरायै नमः

78. ओं महागणेश-निर्भिन्न-विघ्नयन्त्र-प्रहर्षितायै नमः

79. ओं भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिण्यै नमः
80. ओं करांगुलि-नखोत्पन्न-नारायण-दशाकृत्यै नमः
81. ओं महा-पाशुपतास्त्राग्नि-निर्दग्द्धासुर-सैनिकायै नमः
82. ओं कामेश्वरास्त्र-निर्दग्द्ध-सभाण्डासुर-शून्यकायै नमः
83. ओं ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवायै नमः
84. ओं हर-नेत्राग्नि-संदग्द्ध-काम-सञ्जीवनौषधये नमः
85. ओं श्रीमद्वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजायै नमः
86. ओं कण्ठाधः-कटि-पर्यन्त-मध्यकूट-स्वरूपिण्यै नमः
87. ओं शक्तिकूटैकतापन्न-कट्यधोभाग-धारिण्यै नमः
88. ओं मूलमन्त्रात्मिकायै नमः
89. ओं मूलकूटत्रय-कळेबरायै नमः
90. ओं कुळामृतैक-रसिकायै नमः
91. ओं कुळसङ्केत-पालिन्यै नमः
92. ओं कुलांगनायै नमः
93. ओं कुलान्तःस्थायै नमः
94. ओं कौळिन्यै नमः
95. ओं कुळयोगिन्यै नमः
96. ओं अकुळायै नमः
97. ओं समयान्तस्थायै नमः
98. ओं समयाचारतत्परायै नमः
99. ओं मूलाधारैक-निलयायै नमः

100. ओं ब्रह्मग्रन्थि-विभेदिन्यै नमः
101. ओं मणिपूरान्तरुदितायै नमः
102. ओं विष्णुग्रन्थि-विभेदिन्यै नमः
103. ओं आज्ञाचक्रान्तराळस्थायै नमः
104. ओं रुद्रग्रन्थि-विभेदिन्यै नमः
105. ओं सहस्रारांबुजारूढायै नमः
106. ओं सुधासाराभिवर्षिण्यै नमः
107. ओं तटिल्लता-समरुच्यै नमः
108. ओं षट्चक्रोपरि-संस्थितायै नमः
109. ओं महासक्त्यै नमः
110. ओं कुण्डलिन्यै नमः
111. ओं बिसतन्तु-तनीयस्यै नमः
112. ओं भवान्यै नमः
113. ओं भावनागम्यायै नमः
114. ओं भवारण्य-कुठारिकायै नमः
115. ओं भद्रप्रियायै नमः
116. ओं भद्रमूर्त्तये नमः
117. ओं भक्त-सौभाग्य-दायिन्यै नमः
118. ओं भक्तिप्रियायै नमः
119. ओं भक्तिगम्यायै नमः
120. ओं भक्तिवश्यायै नमः

121. ओं भयापहायै नमः
122. ओं शांभव्यै नमः
123. ओं शारदाराध्यायै नमः
124. ओं शर्व्वाण्यै नमः
125. ओं शर्म्मदायिन्यै नमः
126. ओं शाङ्कर्यै नमः
127. ओं श्रीकर्यै नमः
128. ओं साध्व्यै नमः
129. ओं शरच्चन्द्र-निभाननायै नमः
130. ओं शातोदर्यै नमः
131. ओं शान्तिमत्यै नमः
132. ओं निराधारायै नमः
133. ओं निरञ्जनायै नमः
134. ओं निर्ल्लेपायै नमः
135. ओं निर्म्मलायै नमः
136. ओं नित्यायै नमः
137. ओं निराकारायै नमः
138. ओं निराकुलायै नमः
139. ओं निर्ग्गुणायै नमः
140. ओं निष्कलायै नमः
141. ओं शान्तायै नमः

142. ओं निष्कामायै नमः
143. ओं निरुपप्लवायै नमः
144. ओं नित्यमुक्तायै नमः
145. ओं निर्व्विकारायै नमः
146. ओं निष्प्रपञ्चायै नमः
147. ओं निराश्रयायै नमः
148. ओं नित्यशुद्धायै नमः
149. ओं नित्यबुद्धायै नमः
150. ओं निरवद्यायै नमः
151. ओं निरन्तरायै नमः
152. ओं निष्कारणायै नमः
153. ओं निष्कळङ्कायै नमः
154. ओं निरुपाधये नमः
155. ओं निरीश्वरायै नमः
156. ओं नीरागायै नमः
157. ओं रागमथनायै नमः
158. ओं निर्म्मदायै नमः
159. ओं मदनाशिन्यै नमः
160. ओं निश्चिन्तायै नमः
161. ओं निरहङ्कारायै नमः
162. ओं निर्म्मोहायै नमः

163. ओं मोहनाशिन्यै नमः
164. ओं निर्म्ममायै नमः
165. ओं ममताहन्त्र्यै नमः
166. ओं निष्पापायै नमः
167. ओं पापनाशिन्यै नमः
168. ओं निष्क्रोधायै नमः
169. ओं क्रोधशमन्यै नमः
170. ओं निर्ल्लोभायै नमः
171. ओं लोभनाशिन्यै नमः
172. ओं निःसंशयायै नमः
173. ओं संशयघ्न्यै नमः
174. ओं निर्भवायै नमः
175. ओं भवनाशिन्यै नमः
176. ओं निर्व्विकल्पायै नमः
177. ओं निराबाधायै नमः
178. ओं निर्भेदायै नमः
179. ओं भेदनाशिन्यै नमः
180. ओं निर्न्नाशायै नमः
181. ओं मृत्युमथन्यै नमः
182. ओं निष्क्रियायै नमः
183. ओं निष्परिग्रहायै नमः

184. ओं निस्तुलायै नमः
185. ओं नीलचिकुरायै नमः
186. ओं निरपायायै नमः
187. ओं निरत्ययायै नमः
188. ओं दुर्ल्लभायै नमः
189. ओं दुर्ग्गमायै नमः
190. ओं दुर्ग्गायै नमः
191. ओं दुःखहन्त्र्यै नमः
192. ओं सुखप्रदायै नमः
193. ओं दुष्टदूरायै नमः
194. ओं दुराचारशमन्यै नमः
195. ओं दोष-वर्ज्जितायै नमः
196. ओं सर्व्वज्ञायै नमः
197. ओं सान्द्रकरुणायै नमः
198. ओं समानाधिक-वर्ज्जितायै नमः
199. ओं सर्व्वशक्तिमय्यै नमः
200. ओं सर्व्वमंगळायै नमः
201. ओं सद्‌गति-प्रदायै नमः
202. ओं सर्व्वेश्वर्यै नमः
203. ओं सर्व्वमय्यै नमः
204. ओं सर्व्वमन्त्र-स्वरूपिण्यै नमः

205. ओं सर्व्व-यन्त्रात्मिकायै नमः
206. ओं सर्व्व-तन्त्ररूपायै नमः
207. ओं मनोन्मन्यै नमः
208. ओं माहेश्वर्यै नमः
209. ओं महादेव्यै नमः
210. ओं महालक्ष्म्यै नमः
211. ओं मृडप्रियायै नमः
212. ओं महारूपायै नमः
213. ओं महापूज्यायै नमः
214. ओं महा-पातक-नाशिन्यै नमः
215. ओं महामायायै नमः
216. ओं महासत्त्वायै नमः
217. ओं महाशक्त्यै नमः
218. ओं महारत्यै नमः
219. ओं महाभोगायै नमः
220. ओं महैश्वर्यायै नमः
221. ओं महावीर्यायै नमः
222. ओं महाबलायै नमः
223. ओं महाबुद्ध्यै नमः
224. ओं महासिद्ध्यै नमः
225. ओं महायोगीश्वरेश्वर्यै नमः

226. ओं महातन्त्रायै नमः
227. ओं महामन्त्रायै नमः
228. ओं महायन्त्रायै नमः
229. ओं महासनायै नमः
230. ओं महायाग-क्रमाराद्ध्यायै नमः
231. ओं महाभैरव-पूजितायै नमः
232. ओं महेश्वर-महाकल्प-महाताण्डव-साक्षिण्यै नमः
233. ओं महाकामेश-महिष्यै नमः
234. ओं महात्रिपुरसुन्दर्यै नमः
235. ओं चतुःषष्ट्युपचाराढ्यायै नमः
236. ओं चतुःषष्टिकलामय्यै नमः
237. ओं महा-चतुःषष्टिकोटि-योगिनी-गणसेवितायै नमः
238. ओं मनुविद्यायै नमः
239. ओं चन्द्रविद्यायै नमः
240. ओं चन्द्रमण्डल-मद्ध्यगायै नमः
241. ओं चारुरूपायै नमः
242. ओं चारुहासायै नमः
243. ओं चारुचन्द्र-कलाधरायै नमः
244. ओं चराचर-जगन्नाथायै नमः
245. ओं चक्रराज-निकेतनायै नमः
246. ओं पार्व्वत्यै नमः

247. ओं पत्मनयनायै नमः
248. ओं पत्मराग-समप्रभायै नमः
249. ओं पञ्चप्रेतासनासीनायै नमः
250. ओं पञ्चब्रह्मस्वपरूपिण्यै नमः
251. ओं चिन्मय्यै नमः
252. ओं परमानन्दायै नमः
253. ओं विज्ञानघनरूपिण्यै नमः
254. ओं ध्यान-ध्यातृ-ध्येयरूपायै नमः
255. ओं धर्म्माधर्म्म-विवर्जितायै नमः
256. ओं विश्वरूपायै नमः
257. ओं जागरिण्यै नमः
258. ओं स्वपन्त्यै नमः
259. ओं तैजसात्मिकायै नमः
260. ओं सुप्तायै नमः
261. ओं प्राज्ञात्मिकायै नमः
262. ओं तुर्यायै नमः
263. ओं सर्व्वावस्था-विवर्जितायै नमः
264. ओं सृष्टिकर्त्र्यै नमः
265. ओं ब्रह्मरूपायै नमः
266. ओं गोप्त्र्यै नमः
267. ओं गोविन्दरूपिण्यै नमः

268. ओं संहारिण्यै नमः
269. ओं रुद्ररूपायै नमः
270. ओं तिरोधानकर्यै नमः
271. ओं ईश्वर्यै नमः
272. ओं सदाशिवायै नमः
273. ओं अनुग्रहदायै नमः
274. ओं पञ्चकृत्यपरायणायै नमः
275. ओं भानुमण्डल-मद्ध्यस्थायै नमः
276. ओं भैरव्यै नमः
277. ओं भगमालिन्यै नमः
278. ओं पत्मासनायै नमः
279. ओं भगवत्यै नमः
280. ओं पत्मनाभ-सहोदर्यै नमः
281. ओं उन्मेष-निमिषोत्पन्न-विपन्न-भुवनावल्यै नमः
282. ओं सहस्रशीऺषवदनायै नमः
283. ओं सहस्राक्ष्यै नमः
284. ओं सहस्रपदे नमः
285. ओं आब्रह्म-कीट-जनन्यै नमः
286. ओं वऺण्णाश्रम-विधायिन्यै नमः
287. ओं निजाज्ञारूप-निगमायै नमः
288. ओं पुण्यापुण्य-फलप्रदायै नमः

289. ओं श्रुति-सीमन्त-सिन्दूरी-कृत-पादाब्जधूळिकायै नमः
290. ओं सकलागम-सन्दोह-शुक्ति-सम्पुट-मौक्तिकायै नमः
291. ओं पुरुषार्त्थ-प्रदायै नमः
292. ओं पूर्ण्णायै नमः
293. ओं भोगिन्यै नमः
294. ओं भुवनेश्वर्यै नमः
295. ओं अंबिकायै नमः
296. ओं अनादि-निधनायै नमः
297. ओं हरिब्रह्मेन्द्र-सेवितायै नमः
298. ओं नारायण्यै नमः
299. ओं नादरूपायै नमः
300. ओं नामरूप-विवर्ज्जितायै नमः
301. ओं ह्रीङ्कार्यै नमः
302. ओं ह्रीमत्यै नमः
303. ओं हृद्यायै नमः
304. ओं हेयोपादेय-वर्ज्जितायै नमः
305. ओं राजराजार्च्चितायै नमः
306. ओं राज्ञ्यै नमः
307. ओं रम्यायै नमः
308. ओं राजीव-लोचनायै नमः
309. ओं रञ्जिन्यै नमः

310. ओं रमण्यै नमः
311. ओं रस्यायै नमः
312. ओं रणत्किङ्किणि-मेखलायै नमः
313. ओं रमायै नमः
314. ओं राकेन्दु-वदनायै नमः
315. ओं रतिरूपायै नमः
316. ओं रतिप्रियायै नमः
317. ओं रक्षाकर्यै नमः
318. ओं राक्षसघ्न्यै नमः
319. ओं रामायै नमः
320. ओं रमणलम्पटायै नमः
321. ओं काम्यायै नमः
322. ओं कामकलारूपायै नमः
323. ओं कदंब-कुसुम-प्रियायै नमः
324. ओं कल्याण्यै नमः
325. ओं जगती-कन्दायै नमः
326. ओं करुणा-रस-सागरायै नमः
327. ओं कलावत्यै नमः
328. ओं कलालापायै नमः
329. ओं कान्तायै नमः
330. ओं कादंबरी-प्रियायै नमः

331. ओं वरदायै नमः
332. ओं वामनयनायै नमः
333. ओं वारुणी-मद-विह्वलायै नमः
334. ओं विश्वाधिकायै नमः
335. ओं वेदवेद्यायै नमः
336. ओं विन्ध्याचल-निवासिन्यै नमः
337. ओं विधात्र्यै नमः
338. ओं वेदजनन्यै नमः
339. ओं विष्णुमायायै नमः
340. ओं विलासिन्यै नमः
341. ओं क्षेत्रस्वरूपायै नमः
342. ओं क्षेत्रेश्यै नमः
343. ओं क्षेत्र-क्षेत्रज्ञ-पालिन्यै नमः
344. ओं क्षयवृद्धि-विनिर्मुक्तायै नमः
345. ओं क्षेत्रपाल-समर्च्चितायै नमः
346. ओं विजयायै नमः
347. ओं विमलायै नमः
348. ओं वन्द्यायै नमः
349. ओं वन्दारु-जन-वत्सलायै नमः
350. ओं वाग्वादिन्यै नमः
351. ओं वामकेश्यै नमः

352. ओं वह्निमण्डल-वासिन्यै नमः
353. ओं भक्तिमत्-कल्पलतिकायै नमः
354. ओं पशुपाश-विमोचिन्यै नमः
355. ओं संहृताशेष-पाषण्डायै नमः
356. ओं सदाचार-प्रवर्त्तिकायै नमः
357. ओं तापत्रयाग्नि-सन्तप्त-समाह्ळादन-चन्द्रिकायै नमः
358. ओं तरुण्यै नमः
359. ओं तापसाराध्यायै नमः
360. ओं तनुमद्ध्यायै नमः
361. ओं तमोपहायै नमः
362. ओं चित्यै नमः
363. ओं तत्पद-लक्ष्यार्त्थायै नमः
364. ओं चिदेकरस-रूपिण्यै नमः
365. ओं स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-सन्तत्यै नमः
366. ओं परायै नमः
367. ओं प्रत्यक्-चितीरूपायै नमः
368. ओं पश्यन्त्यै नमः
369. ओं परदेवतायै नमः
370. ओं मद्ध्यमायै नमः
371. ओं वैखरी-रूपायै नमः
372. ओं भक्त-मानस-हंसिकायै नमः

373. ओं कामेश्वर-प्राणनाड्यै नमः
374. ओं कृतज्ञायै नमः
375. ओं कामपूजितायै नमः
376. ओं शृंगार-रस-सम्पूर्ण्णायै नमः
377. ओं जयायै नमः
378. ओं जालन्धर-स्थितायै नमः
379. ओं ओढ्याण-पीठ-निलयायै नमः
380. ओं बिन्दु-मण्डलवासिन्यै नमः
381. ओं रहोयाग-क्रमाराध्यायै नमः
382. ओं रहस्तर्प्पण-तर्प्पितायै नमः
383. ओं सद्यःप्रसादिन्यै नमः
384. ओं विश्वसाक्षिण्यै नमः
385. ओं साक्षिवर्ज्जितायै नमः
386. ओं षडंगदेवता-युक्तायै नमः
387. ओं षाड्गुण्य-परिपूरितायै नमः
388. ओं नित्य-क्लिन्नायै नमः
389. ओं निरुपमायै नमः
390. ओं निर्व्वाण-सुख-दायिन्यै नमः
391. ओं नित्याषोडशिका-रूपायै नमः
392. ओं श्रीकण्ठार्द्ध-शरीरिण्यै नमः
393. ओं प्रभावत्यै नमः

394. ओं प्रभारूपायै नमः

395. ओं प्रसिद्धायै नमः

396. ओं परमेश्वर्यै नमः

397. ओं मूलप्रकृत्यै नमः

398. ओं अव्यक्तायै नमः

399. ओं व्यक्ताव्यक्त-स्वरूपिण्यै नमः

400. ओं व्यापिन्यै नमः

401. ओं विविधाकारायै नमः

402. ओं विद्याविद्या-स्वरूपिण्यै नमः

403. ओं महाकामेश-नयन-कुमुदाह्ळाद-कौमुद्यै नमः

404. ओं भक्ता-हार्द्द-तमो-भेद-भानुमद्भानु-सन्तत्यै नमः

405. ओं शिवदूत्यै नमः

406. ओं शिवाराध्यायै नमः

407. ओं शिवमूर्त्त्यै नमः

408. ओं शिवङ्कर्यै नमः

409. ओं शिवप्रियायै नमः

410. ओं शिवपरायै नमः

411. ओं शिष्टेष्टायै नमः

412. ओं शिष्टपूजितायै नमः

413. ओं अप्रमेयायै नमः

414. ओं स्वप्रकाशायै नमः

415. ओं मनो-वाचामगोचरायै नमः
416. ओं चिच्छक्त्यै नमः
417. ओं चेतना-रूपायै नमः
418. ओं जडशक्त्यै नमः
419. ओं जडात्मिकायै नमः
420. ओं गायत्र्यै नमः
421. ओं व्याहृत्यै नमः
422. ओं सन्ध्यायै नमः
423. ओं द्विजवृन्द-निषेवितायै नमः
424. ओं तत्त्वासनायै नमः
425. ओं तस्मै नमः
426. ओं तुभ्यं नमः
427. ओं अय्यै नमः
428. ओं पञ्चकोशान्तर-स्थितायै नमः
429. ओं निस्सीम-महिम्ने नमः
430. ओं नित्य-यौव्वनायै नमः
431. ओं मदशालिन्यै नमः
432. ओं मदघूर्ण्णित-रक्ताक्ष्यै नमः
433. ओं मदपाटल-गण्डभुवे नमः
434. ओं चन्दन-द्रव-दिग्द्धांग्यै नमः
435. ओं चाम्पेय-कुसुम-प्रियायै नमः

436. ओं कुशलायै नमः
437. ओं कोमळाकारायै नमः
438. ओं कुरुकुल्लायै नमः
439. ओं कुळेश्वर्यै नमः
440. ओं कुळकुण्डालयायै नमः
441. ओं कौळमार्ग्ग-तत्पर-सेवितायै नमः
442. ओं कुमार-गणनाथांबायै नमः
443. ओं तुष्ट्यै नमः
444. ओं पुष्ट्यै नमः
445. ओं मत्यै नमः
446. ओं धृत्यै नमः
447. ओं शान्त्यै नमः
448. ओं स्वस्तिमत्यै नमः
449. ओं कान्त्यै नमः
450. ओं नन्दिन्यै नमः
451. ओं विघ्ननाशिन्यै नमः
452. ओं तेजोवत्यै नमः
453. ओं त्रिनयनायै नमः
454. ओं लोलाक्षी-कामरूपिण्यै नमः
455. ओं मालिन्यै नमः
456. ओं हंसिन्यै नमः

457. ओं मात्रे नमः
458. ओं मलयाचल-वासिन्यै नमः
459. ओं सुमुख्यै नमः
460. ओं नळिन्यै नमः
461. ओं सुभ्रुवे नमः
462. ओं शोभनायै नमः
463. ओं सुरनायिकायै नमः
464. ओं काळकण्ठ्यै नमः
465. ओं कान्तिमत्यै नमः
466. ओं क्षोभिण्यै नमः
467. ओं सूक्ष्मरूपिण्यै नमः
468. ओं वज्रेश्वर्यै नमः
469. ओं वामदेव्यै नमः
470. ओं वयोवस्था-विवर्जितायै नमः
471. ओं सिद्धेश्वर्यै नमः
472. ओं सिद्धविद्यायै नमः
473. ओं सिद्धमात्रे नमः
474. ओं यशस्विन्यै नमः
475. ओं विशुद्धिचक्र-निलयायै नमः
476. ओं आरक्तवर्ण्णायै नमः
477. ओं त्रिलोचनायै नमः

478. ओं खट्वांगादि-प्रहरणायै नमः
479. ओं वदनैक-समन्वितायै नमः
480. ओं पायसान्नप्रियायै नमः
481. ओं त्वक्स्थायै नमः
482. ओं पशुलोक-भयङ्कर्यै नमः
483. ओं अमृतादि-महाशक्ति-संवृतायै नमः
484. ओं डाकिनीश्वर्यै नमः
485. ओं अनाहताब्ज-निलयायै नमः
486. ओं श्यामाभायै नमः
487. ओं वदनद्वयायै नमः
488. ओं दंष्ट्रोज्ज्वलायै नमः
489. ओं अक्षमालादि-धरायै नमः
490. ओं रुधिर-संस्थितायै नमः
491. ओं काळरात्र्यादि-शक्त्यौघ-वृतायै नमः
492. ओं स्निग्धौदन-प्रियायै नमः
493. ओं महावीरेन्द्र-वरदायै नमः
494. ओं राकिण्यंबा-स्वरूपिण्यै नमः
495. ओं मणिपूराब्ज-निलयायै नमः
496. ओं वदनत्रय-संयुतायै नमः
497. ओं वज्रादिकायुधोपेतायै नमः
498. ओं डामर्यादिभि-रावृतायै नमः

499. ओं रक्तवर्ण्णायै नमः
500. ओं मांसनिष्ठायै नमः
501. ओं गुडान्न-प्रीत-मानसायै नमः
502. ओं समस्तभक्त-सुखदायै नमः
503. ओं लाकिन्यंबा-स्वरूपिण्यै नमः
504. ओं स्वाधिष्ठानांबुजगतायै नमः
505. ओं चतुर्वक्त्र-मनोहरायै नमः
506. ओं शूलाद्यायुध-सम्पन्नायै नमः
507. ओं पीतवर्ण्णायै नमः
508. ओं अतिगर्व्वितायै नमः
509. ओं मेदो-निष्ठायै नमः
510. ओं मधुप्रीतायै नमः
511. ओं बन्दिन्यादि-समन्वितायै नमः
512. ओं दध्यन्नासक्त-हृदयायै नमः
513. ओं काकिनी-रूप-धारिण्यै नमः
514. ओं मूलाधारांबुजारूढायै नमः
515. ओं पञ्चवक्त्रायै नमः
516. ओं अस्थिसंस्थितायै नमः
517. ओं अङ्कुशादि-प्रहरणायै नमः
518. ओं वरदादि-निषेवितायै नमः
519. ओं मुद्गौदनासक्त-चित्तायै नमः

520. ओं साकिन्यंबा-स्वरूपिण्यै नमः
521. ओं आज्ञा-चक्राब्ज-निलयायै नमः
522. ओं शुक्लवर्ण्णायै नमः
523. ओं षडाननायै नमः
524. ओं मज्जा-संस्थायै नमः
525. ओं हंसवती-मुख्य-शक्ति-समन्वितायै नमः
526. ओं हरिद्रान्नैक-रसिकायै नमः
527. ओं हाकिनी-रूप-धारिण्यै नमः
528. ओं सहस्रदळ-पत्मस्थायै नमः
529. ओं सर्व्व-वर्ण्णोप-शोभितायै नमः
530. ओं सर्वायुध-धरायै नमः
531. ओं शुक्ल-संस्थितायै नमः
532. ओं सर्व्वतोमुख्यै नमः
533. ओं सर्वौदन-प्रीतचित्तायै नमः
534. ओं याकिन्यंबा-स्वरूपिण्यै नमः
535. ओं स्वाहायै नमः
536. ओं स्वधायै नमः
537. ओं अमत्यै नमः
538. ओं मेधायै नमः
539. ओं श्रुत्यै नमः
540. ओं स्मृत्यै नमः

541. ओं अनुत्तमायै नमः
542. ओं पुण्यकीर्त्त्यै नमः
543. ओं पुण्यलभ्यायै नमः
544. ओं पुण्यश्रवण-कीर्त्तनायै नमः
545. ओं पुलोमजार्च्चितायै नमः
546. ओं बन्धमोचिन्यै नमः
547. ओं बर्बराळकायै नमः
548. ओं विमर्शरूपिण्यै नमः
549. ओं विद्यायै नमः
550. ओं वियदादि-जगत्प्रसुवे नमः
551. ओं सर्व्वव्याधि-प्रशमन्यै नमः
552. ओं सर्व्वमृत्यु-निवारिण्यै नमः
553. ओं अग्रगण्यायै नमः
554. ओं अचिन्त्यरूपायै नमः
555. ओं कलिकन्मष-नाशिन्यै नमः
556. ओं कात्यायन्यै नमः
557. ओं कालहन्त्र्यै नमः
558. ओं कमलाक्ष-निषेवितायै नमः
559. ओं तांबूल-पूरित-मुख्यै नमः
560. ओं दाडिमी-कुसुम-प्रभायै नमः
561. ओं मृगाक्ष्यै नमः

562. ओं मोहिन्यै नमः
563. ओं मुख्यायै नमः
564. ओं मृडान्यै नमः
565. ओं मित्ररूपिण्यै नमः
566. ओं नित्य-तृप्तायै नमः
567. ओं भक्तनिधये नमः
568. ओं नियन्त्र्यै नमः
569. ओं निखिलेश्वर्यै नमः
570. ओं मैत्र्यादि-वासनालभ्यायै नमः
571. ओं महा-प्रळय-साक्षिण्यै नमः
572. ओं पराशक्त्यै नमः
573. ओं परानिष्ठायै नमः
574. ओं प्रज्ञानघन-रूपिण्यै नमः
575. ओं माध्वीपानालसायै नमः
576. ओं मत्तायै नमः
577. ओं मातृका-वर्ण-रूपिण्यै नमः
578. ओं महाकैलास-निलयायै नमः
579. ओं मृणाळ-मृदु-दोर्लतायै नमः
580. ओं महनीयायै नमः
581. ओं दयामूर्त्त्यै नमः
582. ओं महासाम्राज्य-शालिन्यै नमः

583. ओं आत्मविद्यायै नमः
584. ओं महाविद्यायै नमः
585. ओं श्रीविद्यायै नमः
586. ओं कामसेवितायै नमः
587. ओं श्रीषोडशाक्षरीविद्यायै नमः
588. ओं त्रिकूटायै नमः
589. ओं कामकोटिकायै नमः
590. ओं कटाक्ष-किङ्करी-भूत-कमला-कोटि-सेवितायै नमः
591. ओं शिरस्थितायै नमः
592. ओं चन्द्रनिभायै नमः
593. ओं फालस्थायै नमः
594. ओं इन्द्र-धनुः-प्रभायै नमः
595. ओं हृदयस्थायै नमः
596. ओं रविप्रख्यायै नमः
